**संस्कृतवार्ता:**

**दिनाङ्क :-09.11.2024**

**प्रात: - 06:55**

**महाराष्ट्रे झारखण्डे मतदानस्य**

**महाराष्ट्रे झारखण्डे च विधानसभानिर्वाचनस्य मतदानस्य तिथिः यथा यथा समीपम् आगच्छति तथा तथा प्रचाराभियानं तीव्रतरं जायते। सर्वेषां राजनैतिकदलानां शीर्षनेतारः मतदातृन् आकर्षयितुं उभयोः राज्ययोः प्रचारकार्ये व्यस्ताः सन्ति। भारतीयजनतापार्टीतिदलस्य वरिष्ठ: नेता प्रधानमन्त्री नरेन्द्रमोदी ह्यः महाराष्ट्रस्य नासिकनगरे जनसभां सम्बोधितवान्। असौ उक्तवान् यत् केन्द्रे राष्ट्रियलोकतांत्रिकगठबन्धन-एनडीए-सर्वकारः राज्यस्य महायुतिसर्वकारः च वंचितानां जनानां कल्याणाय प्रतिबद्धौ स्तः । श्री मोदिना उक्तं यत् राज्ये उज्ज्वला योजनायाः अन्तर्गतं राज्ये पञ्चाशत्लक्ष- महिलाः निःशुल्कं एलपीजी-इत्यनेन वात संरन्ध्रेण लाभान्विताः , हर घर जल-योजनायाः अन्तर्गतं च सपाद-एककोटिभ्यः अधिकानि गृहाणि नालिका - जलेन-संयुक्तानि सन्ति। केन्द्रसर्वकारस्य महाराष्ट्रे महायुतिसर्वकारस्य च योजनानां विषये श्री मोदी अवदत् यत् महाराष्ट्रस्य कृषकाणां कृते पीएम किसानयोजनायाः, नमो शेतकरी योजनायाः च लाभाः लभ्यन्ते। पूर्वं श्री मोदी धूले नगरे निर्वाचनसभां सम्बोधितवान्। झारखण्डे अपि निर्वाचनप्रचारः प्रचलति। झारखण्डस्य सिमडे निर्वाचनसभायां काङ्ग्रेसस्य वरिष्ठनेत्रा राहुलगान्धिना इ भाजपादलं आरोपितं यत् दलं आदिवासीजनानाम् 'जलं, वनं, भूमिं' हर्तुं प्रयतते।**

**नवदिल्लीनगरे**

**केन्द्रीय रसायन-उर्वरकमन्त्री जगतप्रकाशनड्डा नवदिल्लीनगरे चिकित्सासंसाधन-उद्योगस्य सुदृढीकरणाय योजनां प्रारब्धवान्।**

**अस्मिन् अवसरे रसायन-उर्वरकराज्यमन्त्री अनुप्रिया पटेलः औषधविभागस्य सचिवः अरुनीशचावला च अपि उपस्थिताः आसन् । श्री नड्डा अस्मिन् अवसरे उक्तवान् यत् एषा योजना महती परिवर्तनकारिणी भविष्यति।**

**<u>भारतीयमौसमविभागेन</u>**

**भारतीयऋतुविभागेन सम्भावना प्रकटिता यत् तमिलनाडु , पुडुचेरी, कराईकाल, केरल, माहे इत्यादिषु स्थानेषु विद्युता सह अत्यधिक- वृष्टिः भविष्यति। एतदतिरिक्तं हिमाचलप्रदेशे आगामिदिनद्वयं यावत् सघनकुज्झटीका स्थास्यति । ऋतुविभागेन आगामिद्वित्रिदिनेषु दिल्लीनगरे, राष्ट्रियराजधानीक्षेत्रे च धूमः , लघुकुज्झटिका च भविष्यति इति पूर्वानुमानं कृतम् ।**

**<u>शोधनविधेयकस्य 2024</u>**

**व्यावसायिकन्यायालयसंशोधनविधेयकस्य 2024 विषये प्रशासनेन जनानां उपायाः प्रतिक्रियाः च याचिताः। विधिन्यायमन्त्रालयः वर्तमानस्य वाणिज्यिकन्यायालय-अधिनियम २०१५ संशोधनस्य विषये विचारं कुर्वन् अस्ति। विधेयकस्य विषये टीका ndiac dash <u>dla@gov.in</u> इत्यत्र नवम्बर् २२ दिनाङ्कपर्यन्तं प्रेषयितुं शक्यन्ते।**

**<u>ट्वेन्टी ट्वेन्टी क्रिकेट्</u>**

**डरबन्-नगरे दक्षिण-आफ्रिका-देशेन सह चतसृणां अन्ताराष्ट्रिय ट्वेन्टी ट्वेन्टी क्रिकेट् स्पर्धा शृँखलासु प्रथमस्यां टी-20-क्रिकेट्-क्रीडायां भारतेन दक्षिण- अफ्रीकादलं एकषष्टिधवनांकानां पुरस्सरं पराजितम्। भारतेन द्वि अधिक द्विशतं धवानांकानि अर्जितानि। तत्रैव दक्षिण आफ्रीकया एकचत्वारंशत् अधिक एकशतं धावनांकानि अर्जितानि**

**।।इति वार्ता:।।**